# आकाशवाणी

दिनाङ्कः - 08.12.2024 सायम् - 06:20

**मुख्यवार्ताः**

- केन्द्रीयगृहमन्त्री श्री अमित शाहः राजस्थानस्य जोधपुरे सीमासुरक्षाबलस्य षष्ठीतमे स्थापनादिवसस्य उत्सवे निज संबोधने सीमासुरक्षाबलस्य भूमिकायाः प्रशंसाम् अकरोत्।
- विदेशमंत्री डॉ. एस. जयशंकर: अद्य बहरीनदेशे मनामावार्तायां भागं अभजत्।
- उत्तराखण्डे अद्यारभ्य चारधामयात्रा समारब्धा। यत्र भक्ता: चतुर्षु पवित्रधामसु शिशिरनिवासस्थानानां भ्रमणं करिष्यन्ति।
- विद्रोहिभि: अद्य सीरियादेशस्य राजधान्यां दमिश्कोपरि नियन्त्रणं विहितम्। राष्ट्रपति: बशर अल-असद इत्येष: देशं परित्यज्य अज्ञातस्थाने पलायित:।
- एडिलेड्-ओवल- क्रीडांगणे प्रचाल्यमाणायां बॉर्डर्-गावस्कर-ट्रॉफी क्रीडायाः द्वितीय-क्रिकेट-निकष-स्पर्धायां आस्ट्रेलिया दलेन भारतदलं दशस्तोभैः पराजितम् ।

**अमित शाह**

केन्द्रीयगृहमन्त्री श्री अमित शाहः राजस्थानस्य जोधपुरे सीमा सुरक्षा बलस्य षष्ठीतमे स्थापनादिवसस्य उत्सवे निजसंबोधने सीमासुरक्षाबलस्य भूमिकायाः प्रशंसाम् अकरोत्। स: अवदत् यत् सीमासुरक्षायां, छद्ममुद्रां आदानं-प्रदानं निवारयितुं, वामपक्षीय-उग्रवादस्य निवारणे च सीमासुरक्षाबलस्य भूमिका प्रशंसनीया अस्ति।

श्रीशाहमहोदयः देशस्य प्रथमा रक्षापङ्क्तिमालक्ष्य षड्दशकसेवायाः कृते बीएसएफ इति **सीमासुरक्षाबलस्य** सैन्यबलस्य प्रशंसाम् अकरोत्। असौ अस्य सैन्यबलस्य साहसं, शौर्यं, त्यागं च प्रकाशितवान्। असौ पंचषष्ट्यधिकोनविंशशतमवर्षाद् पूर्वपश्चिमसीमयोः सुरक्षायां बीएसएफ इत्यस्य महत्त्वपूर्णां भूमिकां स्वीकृतवान् ।

गृहमन्त्री उक्तवान् यत् देशस्य सीमासुरक्षानीतिः बहुवर्षेभ्यः अस्पष्टा आसीत्, परञ्च प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे अस्मिन् महत्त्वपूर्णानि परिवर्तनानि जातानि। सः अवदत् यत् सीमासंरचनायाः सुदृढीकरणे सर्वकारेण ध्यानं प्रदत्तम्, यस्य कृते प्रतिवर्षं आयव्यकस्य प्रावधानं क्रियते। अर्धसैन्यबलानाम् कल्याणाय अपि सर्वकारेण अनेकाः पदक्षेपाः उत्थापिताः सन्ति । अस्मिन्नेव गृहमन्त्रिणा अमितशाहेन पथचलनस्य निरीक्षणं कृत्वा बीएसएफ-कार्मिकेभ्य: उत्तमसेवायै वीरतापुरस्कारा: , सैन्य सेवा पुरस्कारा: चापि प्रदत्ता: ।

## जयशंकर:-मनामायात्रा

विदेशमंत्री डॉ. एस. जयशंकर: अद्य बहरीनदेशे मनामावार्तायां भागं अभजत्। विदेशमन्त्रिणा डॉ. एस. जयशंकरेण मनामावार्तायां पश्चिमएशियामालक्ष्य भारतस्य व्यापकरणनीतिः प्रकाशिता। एतस्मिन् तेन भारतस्य आर्थिक-सामरिक- हितानां महत्वोपरि बलं प्रदत्तम्। वार्तायाः समापनसत्रे प्रवदता डॉ. जयशंकरेण विज्ञापितं यत् भारत-खाड़ी-सहयोग परिषद् ईरानइराकयोः साकं अशीत्यधिकैकशतं बिलियन-डॉलरमितात्मकः वार्षिकव्यापारः करोति। डॉ. जयशंकर: कतरयात्रायाः समाप्त्यनन्तरं स्वीययात्रायाः द्वितीयचरणे गतरात्रौ बहरीनदेशस्य मनामानगरे सम्प्राप्तवान्। बहरीनस्य विदेशमन्त्रिणा डॉ. अब्दुल्लातिफ बिन राशित अल जायनी इत्यमुना तस्य स्वागतमपि विहितम्। अन्ताराष्ट्रिय-सामरिक-अध्ययन-संस्थानेन समायोजिता इयं मनामावार्ता पश्चिम-एशियाक्षेत्रेषु सुरक्षा-प्रकरणानि अधिकृत्य चर्चायाः कश्चन् प्रमुखमञ्चः वर्तते। अनेन महत्वपूर्ण-क्षेत्रियसमाह्वानानां समाधानार्थं विश्वस्य उच्चस्तरीय-नीति-निर्मातारः विशेषज्ञाश्च एकत्रिताः भवितुमर्हन्ति।

## उत्तराखण्डे चारधामयात्रा

उत्तराखण्डे अद्यारभ्य चारधामयात्रा समारब्धा। यत्र भक्ताः चतुर्षु पवित्रधामसु शिशिरनिवासस्थानानां भ्रमणं करिष्यन्ति। मुख्यमन्त्री पुष्करसिंहधामी अद्य रुद्रप्रयागमण्डलस्य उखीमठस्य ओंकारेश्वरमन्दिरस्य आधिकारिकरूपेण उद्घाटनं कृतवान्। यत्र शिशिरऋतौ भगवतः केदारनाथस्य मूर्तिः प्रतिष्ठितः वर्तते। अस्मिन् अवसरे मुख्यमन्त्री शिशिरचारधामयात्राम् आचरतां तीर्थयात्रिकाणां सौविध्यं वर्धनार्थं सर्वकारस्य प्रतिबद्धतायाः उपरि बलं प्रदत्तवान्।

गतसायं रुद्रप्रयागे अन्यस्मिन् कार्यक्रमे मुख्यमन्त्री घोषितवान् यत् राज्यसर्वकारः शीतकालीन-तीर्थयात्रायाः प्रचारार्थं अधिकारिभ्यः मार्गदर्शिकां प्रददाति। अनेन माध्यमेन क्षेत्रे आध्यात्मिकपर्यटनं वर्धिष्यति, सममेव भक्ताः उत्तराखण्डस्य शीतकालीन दृश्यानाम् आकर्षणस्य च अनुभवं अपि करिष्यन्ति।

## प्रधानमंत्री-राजस्थानयात्रा

प्रधानमन्त्री नरेन्द्रमोदी श्वः राजस्थानस्य हरियाणायाश्च यात्राम् विधास्यति। श्रीमोदी प्रातः जयपुरनगरे गमिष्यति, यत्र सः राइजिंग-राजस्थान-वैश्विक-शिखर-सम्मेलनस्य उद्घाटनं करिष्यति। अवसरेऽस्मिन् सः तत्र उपस्थित-जनान् अपि सम्बोधयिष्यति। मध्याह्ने सः हरियाणायाः पानीपतक्षेत्रे **बीमा-सखि योजनायाः** शुभारम्भं विधास्यति। इयं योजना अष्टादशवर्षात् सप्ततिः वयोवर्गीयानां महिलानां सशक्तिकरणार्थं निर्मितास्ति। कार्यक्रमावधौ प्रधानमन्त्री हरियाणायाः करनालक्षेत्रे महाराणा-प्रताप-बागवानी-विश्वविद्यालयस्य मुख्यपरिसरस्य आधारशिलामपि स्थापयिष्यति।

## सीरिया-विद्रोहिण:

विद्रोहिभि: अद्य सीरियादेशस्य राजधान्यां दमिश्कोपरि नियन्त्रणं विहितम्। वार्ताहरानुसारं तत्रत्य: राष्ट्रपति: बशर अल-असद इत्येष: देशं परित्यज्य अज्ञातस्थाने पलायित:। विद्रोहिभि: द्विसप्ताहादपि अल्पसमये चत्वारि-नगराणि अधिकृतानि। सीरियादेशस्य प्रधानमन्त्रिणा मोहम्मद गाजी अल-जलाली इत्यमुना कथितं यत् स: शान्तिपूर्णरीत्या विपक्षिभ्य: प्रशासनं दातुं सन्नद्ध: वर्तते। विद्रोही-दलेन प्रोदीरितं यत् असद शासनस्य पतनेन सीरियादेशे अन्धकारमययुगस्य अन्त: नूतनयुगस्य च समारम्भ: भविष्यति।

## भारतीय-ऋतुविज्ञान

भारतीय-ऋतुविज्ञान-विभागेन अद्य असम-मेघालय-नागालैंड-मणिपुर-मिजोरम-त्रिपुरादिषु चिररात्रौ प्रात: काले च प्रगाढ-तुषारवरणम् अनुमानितम्। श्व: यावत् पंजाब-हरियाणा-चण्डीगढ़-झारखंड-सिक्किम-पश्चिम-बंगालेषु च एतादृशी स्थिति: एव अनुमानिता । सहैव आगामी-दिवसद्वयं यावत् पंजाबस्य हरियाणाया: चण्डीगढ़स्य च केषुचित् स्थलेषु वृष्टि: अपि संभाव्यते।

## बॉर्डर्-गावस्कर-ट्रॉफी

एडिलेड्-ओवल- क्रीडांगणे प्रचाल्यमाणायां बॉर्डर्-गावस्कर-ट्रॉफी क्रीडायाः द्वितीय- क्रिकेट निकष स्पर्धायां आस्ट्रेलियादलेन भारतदलं दश स्तोभै: पराजितम् । एतेन विजयेन उभयो: पञ्चक्रीडाश्रृङ्खलायां एकं-एकं द्वंद्वं विजित्य सममधिगतौ।

## हॉकी

हॉकी-क्रीडायां कनिष्ठ-महिला-एशिया-चषकस्पर्धा अद्यारभ्य ओमानदेशस्य मस्कटेतिनगरे समारभते। इयं प्रतिस्पर्धा भारतीयसमयानुसारं रात्रौ सार्धाष्टवादने समारप्स्यते। अस्यां स्पर्धायां दशदलानि प्रातिभागम् कुर्वन्ति। प्रथम-ए वर्गे भारतीयदलस्य साम्मुख्यं अद्य बांगलादेशेन सह भाविष्यति तत्रैव स्पर्धायाम् अग्रे कोरिया, जापान, चीन-ताइपे, हांगकांग, श्रीलंकेति देशैः सह भविष्यति।

।।इति वार्ता:।।